International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 64-65
© 2026 IJMH
www.themultijournal.com
Received: 27-04-2026
Accepted: 22-05-2026
Publish : 23-05-2026

**डा. सुकान्तबेहेरा**
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी।

**Correspondence:**
**डा. सुकान्तबेहेरा**
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः,
श्रीविहारः, पुरी।

# दीपिकादृष्ट्या हेत्वाभासलक्षणविवेकः

**डा. सुकान्तबेहेरा**

न्यायशास्त्रे अनुमाने हेतोः प्रमुखं स्थानं स्वीकृतम् । यथार्थानुमितिजनने साधुहेतूनां यथा महत्त्वं विद्यते, तथैव दुष्टहेतूनां सम्यग्विवेचनमपि अत्यावश्यकम् । हेत्वाभासचर्चया केवलं दोषपरिज्ञानमेव न भवति, अपितु तर्कपद्धतेः सूक्ष्मता, निर्णयशक्तेश्च परिपाकः सुस्पष्टो भवति। अतोऽत्र दीपिकाग्रन्थदृष्ट्या हेत्वाभासलक्षणस्य स्वरूपं, तद्विषयकदोषान्, तेषां प्रतिबन्धकत्वञ्च विवेच्यते ।

सव्यभिचारविरुद्धप्रकरणसमसाध्यसमकालातीता **हेत्वाभासाः**[1] इति सूत्रेण पञ्चानां हेत्वाभासानां स्वरूपनिर्देशः क्रियते। अत्र सव्यभिचारादीनां पृथगुल्लेखो न निरर्थकः, किन्तु सामान्यधर्मप्रकारकज्ञानपूर्वकविशेषजिज्ञासाजननाय। "अहेतवो हेतुवदाभासन्ते" इति हेत्वाभासशब्दनिर्वचनात् सामान्यलक्षणस्य बोधो भवति। यथा - **"प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि"**[2] इत्यत्र प्रमाणशब्दस्य प्रत्यक्षादिशब्दसन्निधानेन चतुर्णामेव प्रमाणत्वबोधकत्वं दृश्यते, तथैव सव्यभिचारादिपदानामपि हेत्वाभासविभागबोधनं स्वाभाविकम्। "हेतुलक्षणाभावादहेतवो हेतुसामान्याद् हेतुवदाभासमानाः" इति न्यायभाष्यवचनादपि दुष्टहेतूनामेव हेत्वाभासत्वं प्रतिपद्यते। हेतुसादृश्येनात्र हेतुशब्दस्य गौणप्रयोगः। गोवर्द्धनमिश्रैरपि - **"हेतुवदाभासन्ते इति हेत्वाभासा दुष्टहेतवः" इति व्याख्यातम्** [3]।

'हेत्वाभास' इत्यस्य पदार्थे हेतुसामान्यं सादृश्यं वा किंरूपमिति जिज्ञासायां प्रतिज्ञोत्तरभागे यथा साधुहेतुप्रयोगः दृश्यते तथैव दुष्टहेतुप्रयोगोऽपि दृश्यते, अथवा दुष्टहेतौ प्रकृतहेतोः कस्यचिद्धर्मस्य स्थितिरस्तीत्यर्थः। अन्नंभट्टैः - **"सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पञ्च हेत्वाभासाः"** इति कथितम्[4]।

हेतुत्वं नाम व्याप्तिविशिष्टपक्षधर्मता, हेत्वाभासत्वं तु तादृशव्याप्तिपक्षधर्मताप्रकारक-भ्रमविषयत्वम्। हेतुनिष्ठदोषा एव हेत्वाभासा इति "हेतोराभासा" इति व्युत्पत्त्या बोध्यते। दीपिकायां च - **"अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम्"** इति स्पष्टतया निर्दिष्टम्[5]। अत्र अनुमितिपदस्याजहल्लक्षणया अनुमितिकरणपरत्वं ग्राह्यम्। अन्यथा बाधसत्प्रतिपक्षयोरेव लक्षणस्य प्रवृत्तिः स्यात्, न तु व्यभिचारविरोधस्वरूपासिद्ध्यादीनाम्; तेषां ज्ञानानामनुमितिप्रतिबन्धकत्वाभावात् ।

"ह्रदो वह्न्यभाववान्" इति बाधनिश्चयः, "ह्रदो वह्न्यभावव्याप्यशैवालवान्" इति सत्प्रतिपक्षनिश्चयश्च, उभौ अपि तद्विषयत्वेन अनुमितेः प्रतिबन्धकौ भवतः। अनुमितिपदस्य लाक्षणिकग्रहणेन व्यभिचारादिज्ञानस्य परामर्शप्रतिबन्धकत्वं सिद्ध्यति, तेन लक्षणस्याव्याप्तिदोषो न भवति। अतः व्यभिचारिज्ञानं व्याप्तिभानं बाधते, विरोधज्ञानं साध्यसामानाधिकरण्यभानं निरस्यति, स्वरूपासिद्धिज्ञानं पक्षधर्मताभानमेव निरोद्धुमर्हति।

"पर्वतो निर्वह्निः" इत्याकारकभ्रमस्य "पर्वतो वह्निमान्" इत्यनुमितिप्रतिबन्धकत्वेन वह्न्यभावे अतिव्याप्तिः स्यादिति चेत्, न; लक्षणे "यथार्थ" पदस्य निवेशात्। तेन भ्रमज्ञानस्य यथार्थत्वाभावात् तादृशदोषो न सम्भवति।

वस्तुतः "यथार्थ" पदस्यार्थः तदभाववति तत्प्रकारकभिन्नार्थकत्वम्, न तु तद्वति तत्प्रकारकत्वमात्रम्। अन्यथा "पर्वतो वह्न्यभाववान्" इति भ्रान्तिज्ञानमपि यथार्थं स्यात्। यतो हि पर्वतत्ववति पर्वतत्वप्रकारकत्वेन, वह्न्यभाववति वह्न्यभावप्रकारकत्वेन च तस्य प्रवृत्तिः सम्भवति। अतः यथार्थपदस्य तदभाववति तत्प्रकारकभिन्नार्थकत्वे स्वीकृते "पर्वतो वह्न्यभाववान्" इति ज्ञानं भ्रमात्मकमेव भवति। "भ्रमभिन्नत्वमेव सर्वांशे प्रमात्वम्" इति प्रसिद्धमेव । **बालप्रियायां**[6] स्पष्टोक्तम्–

स्वव्यधिकरणप्रकारावच्छिन्नविशेष्यतानिरूपकत्वाभाव एव भ्रमत्वम्। "रज्जावयं सर्पः" इति भ्रमे रज्जुनिष्ठविशेष्यतायाः सर्पत्वेनानिरूपणाद्भ्रमत्वं सिद्ध्यति। यत्र विशेष्यताया यथार्थनिर्णयः, तत्रैव प्रमात्वम् ।

"स्वनिरूपितत्वस्वाश्रयाभाववद्वृत्तित्वोभयसम्बन्धेन" इत्यस्य तात्पर्यमपि एतदेव। "अयं सर्पः" इति भ्रमे सर्पत्वनिष्ठा प्रकारता रज्जुनिष्ठविशेष्यतायां कल्प्यते। सर्पत्वस्याभाववति रज्जौ तदाध्यासात् भ्रान्तत्वमुपपद्यते। यदि भ्रमभिन्नार्थकयथार्थपदस्वी-कारेऽपि "ह्रदो वह्निमान्" इत्यनुमितेः प्रतिबन्धकरूपेण "ह्रदो वह्न्यभाववान्" इति निश्चयस्य वह्न्यभावेऽपि प्रवृत्त्या अतिव्याप्तिः स्यात् इति शङ्का, तर्हि समाधानम् - **"यद्रूपावच्छिन्नविषयकज्ञानसामान्यमनुमितिप्रतिबन्धकं तद्रूपावच्छिन्नत्वं दोषत्वम्"**[7] । तेन वह्न्यभाववद्ह्रदत्वमेव तत्र ग्राह्यम्, न केवलं वह्न्यभावः। अतः वह्न्यभावे नातिव्याप्तिः।

न च "यथार्थ" पदस्य व्यर्थता। ज्ञानपदेन अनाहार्यत्वविशिष्टनिश्चयात्मकज्ञानस्य ग्रहणात् तस्य सार्थक्यमस्ति। आहार्यज्ञानं नाम विपरीतनिश्चयकाले आरोपः अथवा बाधज्ञानकालीनेच्छाजन्यमानसप्रत्यक्षम्। अनाहार्यत्वं तु तादृशेच्छाजन्यत्वाभावः। निश्चयश्च - **"तदभावाप्रकारकं तत्प्रकारकं ज्ञानम्"**[8] इति । तेन यद्धर्मावच्छिन्नज्ञानं प्रकृतानुमितेः प्रतिबन्धकं भवति, तद्धर्मावच्छिन्नत्वमेव हेतुदोषस्य लक्षणम्।

परे तु एतल्लक्षणं दुष्टहेतूनामेव स्वीक्रियन्ते। ज्ञायमानव्यभिचारादेः प्रतिबन्धकत्वमभ्युपेत्य **"अनुमितिप्रतिबन्धका ये व्यभिचारादय एकज्ञानविषयप्रकृतहेतुतावच्छेदकवत्त्वसम्बन्धेन तत्प्रकारकयथार्थज्ञानविशेष्यत्वम्" इति प्रकाशिकायामुक्तम्**[9]। अनुमितिपदस्य प्रकृतानुमितिपरत्वमपि तत्रावश्यकम्, अन्यथा "पर्वतो वह्निमान् धूमात्" इत्यत्रातिव्याप्तिः स्यात्। "पर्वतो धूमवान्" इत्यनुमितौ धूमाभाववद्वृत्तित्वविशिष्टवह्निरूपव्यभिचारज्ञानस्य प्रतिबन्धकत्वं सम्भवति। किन्तु प्रकृतानुमितिपरत्वस्वीकारे सद्धेतौ दोषाभावात् नातिव्याप्तिः।

**अत्रेदं मधु —**

१. वादजल्पवितण्डासु हेत्वाभासविशेषज्ञानस्य परमावश्यकता वर्तते।
२. हेत्वाभासनिरूपणं तत्त्वनिर्णयविजयहेतुत्वेन महत्त्वपूर्णम्।
३. तत्त्वनिर्णयः प्रमितिरूपनिश्चयविशेषः।
४. विजयः परपक्षाहङ्कारखण्डनरूपफलविशेषः।
५. प्रतिपक्षदुष्टहेतुनिरासार्थं सद्धेत्वसद्धेत्वोः सम्यग्ज्ञानमावश्यकम्।
६.हेत्वाभासशब्देन हेतुदोषा दोषविशिष्टा हेतवश्च बोध्यन्ते।
७. "हेतुवदाभासन्ते" इति व्युत्पत्त्या प्राचीनाचार्याः दुष्टहेतुबोधकतां स्वीक्रियन्ति।
८. "हेतोराभासा" इति व्युत्पत्त्या नव्याः हेतुदोषबोधकतामपि मन्यन्ते।
९. अन्नंभट्टेन दीपिकायां नव्यन्यायपद्धतेरनुगमनं प्रदर्शितम्।
१०.अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेतुदोषस्य प्रमुखलक्षणम्।
११.व्यभिचारविरोधसत्प्रतिपक्षासिद्धिबाधरूपाः पञ्च दोषाः प्रसिद्धाः।
१२. एतेषां दोषविशिष्टा हेतव एव दुष्टहेतवः।
१३. हेत्वाभासज्ञानं अनुमितेः प्रतिबन्धकम्।
१४. प्रतिबन्धकशब्दः कारणीभूताभावप्रतियोगित्वपरः।
१५.अव्याप्तिवारणार्थम् अनुमितिपदस्य लाक्षणिकार्थग्रहणम् आवश्यकम्।
१६. यद्विषयकज्ञानं अनुमितेः परामर्शस्य वा प्रतिबन्धकं भवति स हेत्वाभासः।

यथा — "ह्रदो वह्निमान् धूमात्" इत्यत्र "वह्न्यभाववान् ह्रदः" इति बाधज्ञानं "ह्रदो वह्निमान्" इत्यनुमितेः प्रतिबन्धकं भवति। अतः वह्न्यभाववद्ह्रदो हेत्वाभासः। "ह्रदो धूमवान् वह्नेः" इत्यत्र "धूमाभाववद्वृत्तिर्वह्निः" इति व्यभिचारज्ञानं "धूमव्याप्यवह्निमान् ह्रदः" इति परामर्शस्य प्रतिबन्धकम्। अतः धूमाभाववद्वृत्तिवह्निरपि हेत्वाभासः।

१७. प्रकृतानुमितिपरत्वं प्रकृतपक्षतावच्छेदकावच्छिन्नविधेयविशिष्टानुमितिपरत्वम्।
१८. हेत्वाभासस्वरूपज्ञानात् सद्धेतौ भ्रमस्यावकाशो न भवति।
१९. सद्धेतुज्ञानमेव अभीष्टसिद्धेः प्रशस्तमार्गः; अतः तस्य महत्त्वं निर्विवादम्।

अन्ततः वक्तुं शक्यते यत् हेत्वाभासचिन्तनं केवलं दोषपरिगणनपरं नास्ति, अपितु तर्कशुद्धेः, निर्णयदाक्षिण्यस्य, तत्त्वबोधस्य च मूलाधाररूपेण प्रतिष्ठितम्। न्यायदर्शने अस्य अध्ययनं बुद्धेः सूक्ष्मतां वर्धयति तथा यथार्थविचारपरम्परां दृढयति ।

हेत्वाभासस्य चर्चायां बुद्धिर्भवति सूक्ष्मदर्शिनी।
यथार्थबोधसम्पत्तिः पदार्थेषु प्रकाशिनी ॥१॥
तत्त्वज्ञानसमायोगान्मोक्षमार्गः प्रसिध्यति।
हेत्वाभासतत्त्वबोधो मुक्तेः साधनमुच्यते ॥२॥

**पादटिप्पणीसंस्तुताः ग्रन्थाः**


१. न्या.सू. - न्यायसूत्रम्, महर्षिगौतमः।
२. का.व.- कारिकावली तथा न्यायसिद्धान्तमुक्तावली, श्रीविश्वनाथपञ्चाननभट्टाचार्यः, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, १९९०।
३. तर्कसं. - तर्कसंग्रहः, अन्नंभट्टविरचितः।
४. तर्कसं.दीपि. - तर्कसंग्रहदीपिका, अन्नंभट्टविरचिता।
५. तर्कसं.दीपि.प्रका. - तर्कसंग्रहदीपिकाप्रकाशिका, नीलकण्ठकृता।
६. तर्कसं.दीपि.प्रका.बाल.सम. - तर्कसंग्रहदीपिका-प्रकाशिका-बालप्रियासमन्विता, बालप्रिया – एन्. एस्. रामानुजताताचार्यविरचिता, श्रीमहालक्ष्मी पब्लिकेशन्स्, २००८।
७. न्या.बो. - न्यायबोधिनी, गोवर्द्धनमिश्रः।


**पादटिप्पणी**

1. न्या.सू. १/२/४ ।
2. न्या.सू. १/१/३ ।
3. तर्कसं., न्यायबोधिनी ।
4. तर्कसं. ।
5. तर्कसं.दीपि. ।
6. तर्कसं.- दीपि.प्रका.बाल. सम. ।
7. तर्कसं.- प्रका. अनुमानपरिच्छेदे ।
8. तदभावाप्रकारा धीस्तत्प्रकारा तु निश्चयः । का.व. १२९ ।
9. तर्कसं., दीपि.प्रका. अनुमानपरिच्छेदः ।